अनुमानचिंतामणिटीका गूढार्थतत्त्वदीपिका

नं० १५१३-घ

पत्राणि १-६

१९६-पत्र

चौं नामसली टीका रघु देवी

न्याय

३५

राम कृष्ण मा भरतेति गविन्दिनि मा इतर कृष्ण लेन s वेलोय॥

स्तावकवतो नाम ऋषिः प्रकृतिछंदः मं वीजं स्वाहा शक्तिः मं वीजं स्वाहा शक्तिः

१ [illegible] ॥

२५०

रामः ॥३॥

श्रीगुरुभ्यो नमः ॥ कर्पूरद्युतिधवलं केवलमीशानकीर्तितं ब्रह्म । वेदविदितरहस्यं सकलं तं नमस्यामः ॥१॥ अनुमानपरि
च्छेदगूढार्थन्यक्तीपिका । धीराणां मुदकारा वरगुरुदेवेन तन्यते ॥२॥ अथ संगतानभिधाने ज्ञः तप्रत्यक्षविलक्षणं
कस्यादिसंगतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानीते ॥ प्रत्यक्षोपजीवकत्वादित्यादि । अत्र प्रत्यक्षोप
जीवकत्वादित्यस्य प्रत्यक्षप्रमित्युपजीवकत्वात् प्रत्यक्षप्रमाणोपजीवकत्वाच्चेत्यर्थः । प्रत्यक्षानन्तरं इत्य
स्य प्रत्यक्षप्रमितिनिरूपणानन्तरं प्रत्यक्षप्रमाणनिरूपणानन्तरं चेत्यर्थः । प्रत्यक्षपदस्य उभयत्र प्रयो
गात् । अनुमानमित्यस्य भावल्युटानुमितिः करणल्युटानुप्रमाणं चार्थः । एवं उपमानेत्यत्र
ऽपि । तथा च प्रत्यक्ष ।वकत्वात् प्रत्यक्षप्रमितिनिरूपणानन्तरं बहुवादिसंमतत्वात् तदु
पमितेः प्रागनुमितिनिरूपणं [illegible] प्रमाणनिरूपणानन्तरं बहुवा

सिद्धिनाशंकनीपं

दिसंम तत्वानुउपमानाशाकुं अनुमानप्रमाणं च निरूप्यत इति समुदितार्थः। अथ तोनो मत्रसंगमप्रदर्शीतेन ग्रंथका
रस्य न्यनेनावतिः। अथ वै प्रसंगतु योछाताहेतुतावसरस्थाप्या।। निर्वाहिं कैककार्यतेवोदासं गतिरित्यने
नवरिगलिनानावच्छिंध संगतीनामनंतः पानितउय जीवकत्वस्यनसंगातिवं हेतुनावदस्योपजीव
कत्वस्यपदार्थ कार्यत्वकारणत्वं चेत्यर्थः। अथ धिकलं नुमानं दीधितिगे अनुसंधेहे। वहुवादिसंम
कत्री नत्वादिना।। उपमाननिरूपणानंतरमेवानुमानरूपणेन निरूपितमिति शंकानिरासः। वहुवादिसंम
तमेवप्रथमं निरूप्यत इत्यस्योत्सर्गकेत्वादिति प्रकारांतरनुद्दिधितावनुसंधेयातत्रैत्यादित्र
त्रघटकलसमस्यार्थः। कर्तव्यनिरूपणकानुमानलक्षणतत्पदार्थः। तत्पाच व्याप्तिविशिष्टपक्षधर्म मेतान्ज्ञानत्वं
त्वंज्ञानकर्तव्यनिरूपणकालयाण पदेकानुमितिसमुदितार्थः। विशिष्टवैशिष्ट्यप्रतिविशेषणज्ञानस्यहे ग्रंथा

नुतदपधारं किमुतार्थज्ञानं विना विशिष्टार्थज्ञानासंभवात् । विशेषणार्थं अनुमितिः । प्रथमं निरूपितेति तत्र
व्याप्तेव्याप्तिविशिष्टेत्यत्र पक्षधर्मताज्ञानमिति कर्मधारयः । व्याप्तिविशिष्टपदं व्याप्ति प्रकार
कपरं । पक्षधर्मत्वपक्षत्वं निर्व्वा । तथा च । व्याप्तिप्रकारकपक्षवृत्तिताविषयकज्ञानजन्यं ज्ञानम
नुमितिरित्यनुमितिलक्षणं पर्यवसन्नं । पर्वतो वह्निमानित्याद्यनुमितौ व्याप्तिप्रकारकपक्षध
र्मताज्ञानात्मकवह्निव्याप्यो धूमः पर्वते इति ज्ञानजन्यत्वात् लक्षणसमन्वयः । न च विशिष्टवैशि
ष्ट्यबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुतया वह्निव्याप्यधूमवान् पर्वत इ
त्यादिज्ञानजन्ये वह्निव्याप्यधूमवत्पर्वतमानयं देशविशिष्टवैशिष्ट्यबोधात्मकशाब्दबोधप्रत्य
क्षादावतिव्याप्तिरिति वाच्यं । व्याप्यप्रकारकपक्षविशेष्यकनिर्णयत्वावच्छिन्नकारणता प्रतिबो

णिकार्यताप्रविमुक्ताभावत्वावच्छिन्नविषयताकत्वस्य ज्ञानत्वस्य प्रवृत्ते विवक्षितत्वात्। उपदर्शितविशिष्टवैशिष्ट्या
वगाहिशाब्दबोधीयतेव्याप्तिपदार्थे किं मुक्ताभावविषयकतेनाऽनुपपत्त्यभावात्। अत्र वह्निव्याप्यधूमवान्पर्व
त इत्यादिज्ञानजन्ये एतज्ज्ञानलौकिकप्रत्यक्षे उपमानात्पकज्ञानात्मकत्वे तन्नृज्ञानजन्ये पर्वतो वह्निमानित्युप
मितिभावे चाऽतिव्याप्तिवारणाय तथाविधनिर्णयत्वावच्छिन्नजनकतानिरूपितजन्यतायां निवेशः। तथा
च तत्रनातिव्याप्तिः। तादृशज्ञानलौकिकप्रत्यक्षं प्रति तादृशज्ञानस्य विषयत्वेन तथाविधोपनीतभानं प्र
ति तथाविधज्ञानस्य वह्न्यादिज्ञानत्वेनैव च हेतुतया तथाविधानिर्णयत्वेन तत्र हेतुतायामभावात्। न चैवं
सति वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्याद्यनुमितौ अव्याप्तिः। तत्र व्याप्तिवैशिष्ट्येनाभावविषयता

३

केवलान्वयित्वघटितोपदर्शितलक्षणविरहाद्धि तिवाच्यं॥ तथाविधघटानकत्वानिरूपितताभावात् विषयकत्वस्ति
जेव्यतावच्छेदकस्य अनुभवत्वव्याप्यजातिमत्त्वविवक्षितत्वात् तथाविधपक्षव्यतावच्छेदकपर्वतो वह्निमानिद
सनुमितौ च तित्तादृशानुमितित्वात्मकजातिमादाय सर्वत्र लक्षणसमन्वयात्। अनुभवत्वव्याप्यत्वं चानुभव
निष्ठभेदेन प्रतियोगितावच्छेदकत्वं॥ अतोनानुभवस्याभेदेन ~~[illegible]~~ अनुभवत्वव्याप्यतयाते
तायच्छेदकस्य घटे अतिव्याप्तिः। अतउक्तं साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकं साध्यतावच्छे
दकावच्छिन्नसामान्यसामानाधिकरण्यरूपव्याप्तिः। साध्यसाधनभेदनभिन्नत्वाद्यसामानाधिकरण्याभावेनावि
शिष्टधूमनिष्ठवह्निनिरूपितव्याप्तिरेव निवेशनीया पर्वतत्वादिनापक्षेऽपि निवेशनीयः। एवं साध्याधारणपक्षे

२

नि

त्वेकस्याभावात् तथा च पर्वतो वह्निमानित्यविशेषणतानिरूपितवह्निव्याप्यधूमवत्त्वावच्छिन्नप्रकारतानिरूपितवह्नि
न्नेकारणतावच्छिन्नविषयकेनोल्लेखान्यतरत्तिकार्यतात्रापि ह्यानस्य अनुमितित्वं लक्षणं पर्यवसन्नं
एवं च धूमपक्षानुमितावव्याप्तिः शिलविपिवरांसंयोजोतिघटितलक्षणकरणेनोपदर्शितत्रिस्याम
वैत्रानुमितित्वजातिमादायलक्षणसमन्वयादिति। नचैवं सति अनुमितिमेव च अनुमितिल
क्षणं अस्तु। किमितरांशेनेति वाच्यं। अनुमितित्वरूपेण ज्ञातेरानिवेशेन प्रकृते यथासंनिवेशेन वै
शानिवेश्य व्याप्याभावादिति लक्षणे वक्तव्य तरजल्पनेनेति॥ ॥श्रीमतो रामायणनमः॥ ॥तत्करणमिति॥
मितिकरणानुमितिकरणत्वमित्यर्थः। अनुमानमिति। अनुमानपदवाच्यमित्यर्थः। अनोनलक्षणल

मु॰ चिं॰ वृत्तेव स्तत्पमान लिंगकरणतावादिमते लिंगपरिषयकस्याप्यनुमानतत्प्रामनुमानत्वावच्छेदकत्वमिति सुरेचि
होपनीतकतायामप्यनेन तस्मात्तत्वे ह्येवा निषेधानतिप्रामकत्वामनवतार्कथंप्रत्यक्षोपनीतकतादि
त्वे स्पष्टोत्ता रीत्या रीका नियमोति ॥ ४

[illegible] तावच्छेदकत्वेऽतिप्रसक्तिः । निरुक्तानुमान [illegible] करणस्य लक्ष्यमाह तत्त्वेति । तस्य पेचात् मितिकरणविशेषणस्य
त्यर्थः । लिंगपरामर्श लिंगविशेष्यकं व्याप्तिज्ञानं । यथाश्रुते व्याप्यप्रकारकपक्षविशेष्यकज्ञान
त्वेक रूपमर्शस्य व्यापारत्वव्याघातवन्नु करणं तत्स्वरूपकरणत्वाभावेनानुपपत्तिः । वक्ष्यत इति । परा
मर्शग्रंथे वक्ष्यत इत्यर्थः । तथा च निरुक्तानुमानलक्षणस्य व्याप्तिज्ञानमेव लक्ष्यमिति भावः । अयं नुमा
नलक्षणमुक्तात्मसंगानस्त्वामाण्यव्यवस्थावितुं चार्वाकमतं उपापादितेति । अथेत्यादि । अनुमानं धु
मादिविशिष्टकव्याप्तिज्ञानं । एतेनानुमितिकरणत्वरूपानुमानत्वे रूपानुमानत्वस्य पक्षतावच्छेदक त्वेऽपि [illegible] नेऽप्राप्यसिद्धिरिति परास्तं । धुमादिज्ञानत्वस्य प्रकृते पक्षतावच्छेदकत्वान्न प्रमाणमितिरस्करणं भिन्नं । अत्र प्रमाण तावच्छेदकस्य पक्षत्वादिति हेतुः पुरणी [illegible] । नन्वत्र

४

पः ॥

पर

४ व्यभिचारसंशयात् सर्वत्र व्यभिचारसंशयसंभवादुपाधिसंशयस्य व्याप्यसंशयविधया व्यभिचारसंशयाधायकत्वादिति भावः

स्वरूपासिद्धो हेतुः। प्रमाणं तावदुक्तव्याप्तिप्रकारकधूमादिविशेष्यकनिर्णयस्य धूमादिविशेष्यकव्याप्तिज्ञाने सत्यादित्येतन्मूलाहा। योग्योपाधिनामित्यादि। कोप्यनुपलब्धावपक्षे एवं दृष्टः। कोप्योपाधिर्भवेद्यात् योग्योपाधिसत्त्वे तदुपलभ्येत तावत्तिविशिष्टभूते योग्योपाधिरुपलंभाभावेन प्रतियोगिसत्त्वप्रसंजनप्रसंजितोपलंभप्रतियोगिकाभावस्य योग्यानुपलब्धिपदार्थत्वात्। तथा च व्याप्तिनिर्णयप्रतिबंधकीभूतव्यभिचारज्ञानस्य ~~सर्वत्र सं[illegible] शयसंभवीनुपाधिसंशयस्य व्याप्य~~ ~~संशयविधया व्यभिचारसंशयादिति भावः। तथा च व्याप्तिनिर्णयप्रतिबंधकीभूतव्यभिचार~~ ~~[illegible]~~ सर्वत्र सत्त्वेन व्याप्तिनिर्णयस्यासंभवितया व्याप्तिनिर्णयस्याभावेनोपदर्शीतरित्यो व्यसंभव इति भावः। नन्वनुपाधिसंशयात् व्यभिचारसंशयो न संभवति प्रतिबंधकीभूतसाध्यसाधनसहचारज्ञानस्य सत्त्वादित्यत आह

लेन व्याप्तिनिर्णयस्यासं[illegible]रिति[illegible]त्र तथोक्तिरिति ध्येयं ॥ ४ ॥

स्वरूपासि

[illegible] ॥ ॥

स्वरूपासिद्धस्य [illegible] मवद्दिपाक्षे

व्यक्ति-चावज्ञानत्व

तत्र प्रामाण्यानिश्चये ज्ञानानुपपत्त्या चावक्ष्यमाणत्वं च लोहलेख्यत्वयोः ज्ञानस्य सत्त्वादित्यर्थः। वि॰ टि॰ २ छु॰ वे

१२ स्या नस्य [illegible]

मु॰ शतश सहचरितयोरित्यादि। शतश सहचरितयोः पार्थिव[illegible] हीरके व्यभिचार[illegible]प्रति

बंधकत्वे न संभवतीति भावः। ननु अनुमानप्रामाण्यं तु कारे धूमादिज्ञानानंतरं वह्निज्ञानासंभवेन तद्दुत्तरं प्रवृ

त्तौ व्यवहारमात्रोच्छेद इति विशदप्रयोजनस्य व्यवहारानुपपत्तिः। व्यवहारज्ञानं प्रति व्यवहर्तव्यज्ञानस्य हेतुत्वादित्यत

आह। लोक इत्यादि। लोक इत्यस्य व्यवहारे इत्यत्रान्वयः। चस्त्वर्थे तथा च धूमज्ञानानंतरं लोके वह्निव्यवहा

र उपस्थित इत्यर्थः। संभवनामात्रादि त्ति॥ धर्मधर्म्यंसंसर्गाग्रह विशिष्टप्रत्यक्षं तज्ज्ञानकालीनवह्निज्ञानादित्यर्थः।

कता प्रवृत्तेव त्वं रे स्मरणा [illegible] ग्राह्यज्ञानस्यैव संभवे [illegible] नैप ज्ञार्थत्वादि इति मात्रपदेनात्र ज्ञानांतरव्य

५ वच्छेदः। ननु चार्वाकमते वह्न्यादिर्द्विविधः। पारमार्थिकोऽपारमार्थिकश्चात्र पारमार्थिकवह्निर्निर्विकल्पं ज्ञानं क

रा॰ म॰

बुद्धिविषयको

अपारमार्थिकवह्निः सविकल्पकज्ञानविषयः

विषयाः ॥ तस्य पारमार्थिकवह्निविषयकत्वे न तत्र वह्नित्वभावानुपपत्तेः । तन्मते वह्नित्वादेर् वह्निभेदादिरूपात्
ख्यातत्वात्मकरूपस्याभावतत्पर्याप्त्याभ्यासिद्धालौकिकस्य पारमार्थिकवह्न्यादेः संबंधाभावात् । स्मदस
तोसंबंधांगीकारात् ॥ एवं च उपदर्शितस्यारोपितवह्न्यादिव्यवहारांगीकारे तादृशव्यवहारजनकज्ञाने
सर्वसिद्धस्य प्रामाण्यानुभवस्यानुपपत्तिः । स्मरणात्मकज्ञा[illegible]नादेः स्वप्रकारतयालौकिकविषयकेऽप्रा
माण्याभावात् । तन्मते अलौकिकविषयकज्ञानस्य भ्रमत्वादित्यत आह । संवादेनेत्यादि ॥ संवादेन नि
विकल्पकमूलकसविकल्पकविषयविषयत्वरूपसंवादात्मकदोषेण प्रामाण्याभिमानमिमा
नं तथा वीध्यव्यवहारजनकवह्नि[illegible] स्मरणे प्रामाण्यं भ्रमात् । तथा च तत्र भ्रमात्मकज्ञानेनैव तादृ

मु॰ २ अनुभवस्य निर्वाह इति भावः। उपसंहरति। इतीत्यादि। अनयादिशा अनुमानस्याप्रामाण्ये तद्धि-
॥६ नशक्तिग्रहप्रयोजकोपमितिशब्दानामनेकयोरुपमानशब्दयोः सुतरामप्रामाण्ये प्रत्यक्षातिरिक्तं न प्रमा-
णमित्यर्थः। नन्वेवमुपक्रमोपसंहारविरोधः अनुमानत्वावच्छिन्ने अप्रामाण्ये साधनस्योपक्रान्तत्वा-
त्तद्धर्मावच्छिन्नापवर्तस्योपसंहारेऽप्यनौचित्यात्। उपक्रमोपसंहारयोः समानप्रकारकत्वनियमा- ॥६
नुपपत्तेर्नाप्रत्यक्षं प्रमाणमिति अनुमानप्रामाण्यमित्यस्य नापसंहारः अपि चोदमविप्रतिज्ञा-
तरमिति। अपवादानां प्रत्यक्षमिति उपसंहारानुरोधेन अनुमानं न प्रमाणमित्युपक्रमोऽपि ना-
प्रत्यक्षं प्रमाप्रमाणमित्युत्तरतया व्याख्येयः। अनुमानशब्दस्य अनुप्रत्यक्षानन्तु अनुम

नुमाने प्रमाणमिति कुतस्त्यात् तथाविधार्थसंभवादिति॥ ननु अनुमानस्याप्रामाण्यं प्रमाणतावच्छेदकरूपशून्यस्य हेतुना साध्यते
अनुमानं न प्रमाणं शब्देन बाधितत्वादित्यत आह॥ अनुप्रमाणसाधर्म्येणेत्यादि॥ अप्रमाणसाधर्म्येण अप्रमाणत्वे इति
धर्मेण प्रमाणतावच्छेदकरूपशून्यत्वेनेति यावत्। यथाश्रुते चक्षुरादेर्व्यभिचारात् दृष्टसाधर्म्यस्य ज्ञा प्रमाणा
प्रमाणसाधर्म्यस्य ज्ञायमानप्रमाणतावच्छेदकरूपशून्यत्वस्येति यावत्। अनुमानत्वादनुप्रमाणत्वादि दृष्टे
ज्ञायमाने हेतोरनुमानत्वं संगिकुर्वतामाचार्याणां मतं भवत्वेवोक्तं॥ चिन्तामणिकारमते तु न यावीध हेतुज्ञा
नमेवानुमानं प्रमाणमित्यवधेयं। अंत्ये आह। एतदावर्त्स्वेत्यादि। एतदावस्यस्य अनुमानन प्रमा

मु॰ णमिति वाक्यस्य संदिग्धविपर्यस्तान्यतरं प्रति अनुमानं प्रमाणं न वेति संदेहविशिष्टपुरुषं प्रति अनुमानं प्रमाणमिति वि॰ टि॰ मु॰
ति अप्रामाण्यविपर्ययप्रामाण्यप्रकारकज्ञानविशिष्टं चेत्यर्थः। यथैव तात्तादृशपुरुषयोस्तथाविधसंदेहनाशे
तथाविधविपर्ययनाशकोपयोगकत्वेन तदुभयवृत्तित्वेन वक्तव्यतथाविधसंदेहतथाविधविपर्ययज्ञानयोः
अप्रत्यक्षत्वात्तादृशशब्दप्रयोगकर्तुरप्रत्यक्षत्वादेवं भावः। अनुमानस्याप्रामाण्ये तथाविधशङ्कोत्पत्तिरे
८ व न संभवति॥ तथाहि परकीयस्य तथाविधसंदेहविपर्ययज्ञानान्तरस्य तादृशशब्दप्रयोगकर्तुः प्रत्य
क्षासंभवेन ज्ञानतया तत्तज्ज्ञानत्वाशङ्कापेक्षले तज्ज्ञानासंभवे अप्रामाण्यबुद्धिप्रतिप्रतियोगिज्ञानस्याहेतुत्वात्॥ ८
तथा चेष्टसाधनताज्ञानाभावेन तत्साधनताज्ञानस्याप्यसंभवात्। तादृशशब्दानुकूलकेष्टतायाः साधनताभिधा
नेप्रवृत्त्यभावइति॥ तादृशशब्दानुकूलकेष्टतायाःसाधनताभिधानाभावात्। जनकाभावेन तादृशशब्द एव न संभवति
कुतः तस्मादनुमानेऽप्रामाण्यसाधनमिति॥ ननु तथाविधेष्टवत्तिप्रयोगिपरकीयसंशयादेर्ज्ञानं निरुक्त

भावनात्मकमेव तत्र भविष्यतीति तेनोक्तानुपपत्तिरिति शेषांतरमाह॥ एतद्वाक्यस्येत्यादि॥ अनुमानं न प्रमाणं इति वाक्यस्य
प्रामाण्ये प्रामाण्ये च प्रत्यक्षातिरिक्तस्य प्रामाण्यव्याघातादित्यर्थः॥ एतद्वाक्यस्य प्रामाण्ये साध्यादेव प्रत्यक्षातिरि-
क्तस्यैव तद्वाक्यस्य प्रामाण्यमागतं अप्रामाण्ये च भ्रमजनकत्वे लक्षणप्रामाण्यघटकीभूतभ्रमस्य स्वविषयबो-
धो धिनतेषामनुमाने प्रामाण्याभावरूपतथाविधविषयबाधस्यावश्याभ्युपेयतया प्रत्यक्षातिरिक्तस्या-
नुमानप्रामाण्यं दुष्परिहरमिति भावः॥ ननु अनुमानं न प्रमाणमिति वाक्यस्याप्रामाण्येऽपि दर्शितरीत्या अनु-
मानस्य प्रामाण्यमावश्यकमित्यशुद्धं॥ यतो भ्रमजनकत्वमप्रामाण्यं न वदामः॥ अपि च प्रमाकरणत्वव्यतिरेक-
मेवेति नानुपपत्तिः॥ अतो दूषणांतरमाह॥ अपि चेति॥ प्रत्यक्षस्य प्रत्यक्षात्मकज्ञानस्याप्रामाण्यापत्तेः॥
प्रामाण्यासिद्धिप्रसंगात् तस्यानुमेयत्वात् तत्प्रामाण्यस्यानुमानप्रमाणगम्यत्वात्॥ तथा चानुमानप्रामाण्ये

३. प्रत्यक्षस्य प्रामाण्यसिद्ध्या प्रत्यक्षमपि प्रमाणं न स्यादिति भावः ॥ ननु प्रत्यक्षात्मकज्ञानस्य प्रामाण्यं स्वेन वा गृह्य
इति चेदनुमानाप्रामाण्ये न प्रत्यक्षस्य प्रामाण्यासिद्धिप्रसंगात् । तत्प्रामाण्ये प्रत्यक्षस्यैव प्रमाणत्वादत आह ।
स्वतः प्रामाण्यग्रह इति । प्रत्यक्षवृत्तिप्रामाण्यस्य स्वेनैव ग्रहे इत्यर्थः ॥ तत्संशयानुपपत्तेरिति ॥ अयं घट इ
२ त्यादिव्यवसायानन्तरं तिव घटे ज्ञानमानस्य इदं ज्ञानं प्रमा न वेति संशयस्या[illegible] पत्तापत इत्यर्थः ॥ निश्चि
यो ते संशयायोगादिति भावः ॥ वस्तुतस्तु वह्निव्याप्यधूमः पर्वत इति ज्ञानानन्तरं तद्वह्निज्ञानेन तत्तर २
मोवि वह्निमनुमिनोमीत्यनुभवसिद्धस्यानुमितित्वरूपजातिविशेषस्यावश्यकतया तत्त्ववह्नित्वप्रतिबं
धिज्ञानस्य करणत्वं अवश्यं वाच्यं ॥ अन्यथा ज्ञानमात्रस्यासाधारणकारणत्वानुपपत्तेः । तथा न व्याप्ति
तथा च व्याप्तिज्ञानस्यानुमानप्रमाणत्वमावश्यकमिति ॥ अधिकमनुमानसविचारे अनुसंधेयं ॥

ननु व्याप्तिनिर्णीते सत्यनुमानप्रामाण्यस्य परं संभवति॥ सर्वं गोलहित्यादि व्यभिचारेण संशये न तत्प्रतिबन्धा
दौ न त्राह॥ व्याप्तिग्रहोपायश्चेति॥ वक्ष्यते व्याप्तिनिरूपणानन्तरं प्रतिपादयिष्यते। व्याप्तेर्वचलेव[?]प
मानमित्यानग्रहोपायस्यापि ईर्वचनमित्याशंकां मनसि कृत्वा॥ प्रथमं व्याप्तिनिरूपणमाहोने
त्वादि॥ अनुमितिर्व्याप्तिज्ञानेअनुमितिकरणं व्याप्तिज्ञानं व्याप्तिनिश्चय इति यावत् । तस्येव

हेतु ज्ञाने

नुमानप्रमाणत्वेन प्रवृत्तेरुपस्थितत्वात् । अत्र विवक्ष्यं सत्यमर्थः। संगनिश्चायत्रानुमितित्वध
णेन सह प्रवृत्तघटकत्वरूपौ को वा तइति॥ तद्विरुक्तिः॥ हि पक्षमात्र व्यभिचारित्वेने
ति सर्वस्मिन्स्थलेष्वाले संबध्यते॥ तथा चपक्षादि व्यभिचारित्वं न साध्याभाववद्वृ

मु॰ तित्वमित्यादि स्वरूपेण केवलान्वयित्वाभावात्॥ अतो व्यभिचारतत्त्वस्य दुर्वचनतया न व्याप्तिस्वरूपमित्य-
न्वयो बोध्यः। अतो नात्र नकारद्वयानर्थक्यमिति॥ साध्याभाववदवृत्तित्वमित्यत्रापि भावेषगर्भो
बहुव्रीहिः॥ तथा हि वृत्तेरभावोऽवृत्तिः साध्याभाववदवृत्तित्वस्य भावः। साध्याभाववदवृत्तित्वं
वह्निमान्धूमादित्यादौ साध्याभाववति जलह्रदे हेतोरवृत्तितया लक्षणसमन्वयः॥ धू-
मवान्वह्नेरित्यादौ धूमाभाववति अयोगोलके वह्नेर्वृत्तितया नातिव्याप्तिः। न च धूमाभाववति
अयोगोलके वह्नेर्वृत्तित्वेऽपि धूमाभाववति जलह्रदे तस्यावृत्तितया दुरुद्धरैवेति वाच्यं
॥ साध्याभाववदवृत्तित्वमित्यत्र साध्याभाववद्वृत्तित्वावच्छिन्नाभावस्य विवक्षणात् सामा
वृत्तित्वं हेतुतावच्छेदकसंबंधेन ग्राह्यं॥ अतएव ह्रिमान्धूमादित्यौ वह्न्यभाववति जल

५ ६ ४ ह॰१४ २

हेदे कालिकसंबंधेन धूमस्य वह्न्यभाववति न क्षतिः। साध्याभावः साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छे
दकावच्छिन्नप्रतियोगिताको ग्राह्यः॥ अतो वह्निमान् धूमादित्यादौ समवायादिसंसबंबंवच्छिन्नप्रतियो
गिताकवह्न्यभावमहानसीयवह्न्यभावादिकमादाय दोषः। साध्याभाववत्त्वं दैशिकविशेषणतावि
शेषसंबंधेन बोध्यं॥ अन्यथा कालिकसंबंधेन वह्न्याद्यभाववति पर्वतादौ धूमात् पर्वतावपि नक्ष
तिः॥ न चैवं सति घटत्वाभाववान् पटत्वादित्यादौ अव्याप्तिः। अत्र घटत्वाभावाभावस्य घटत्वस्या
भाविप दैशिकविशेषणताविशेषसंबंधेनाधिकरणताया अप्रसिद्धिरिति वाच्यं। अभावाभावस्या
तिरिक्तत्वांगीकारात्। साध्याभाववत्तयाः साध्यवत्ताग्रह विरोधिता नियामकसंबंधे

बंधा२

 न विवक्षणात् ॥ अत एव कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावाप्रमत्वादित्वादौ नाव्याप्तिः।
अन्यथा तथाविधसाध्याभावस्याकाशाभावस्याधिकरणे आत्मादौ आत्मत्वस्य वृत्तित्वेनाव्याप्तेः।

न चैवं सत्यपि सत्तावान् जातेरित्यादावव्याप्तिः। ध्वंसो भाववत्तिसामान्यादौ हेतुतावच्छेदकवत्तेरप्र
 सिद्धेरिति वाच्यं स्वाधिकरणावृत्तिसाध्याभावकत्वमित्यस्य विवक्षणात् स्व[illegible] अत्र हेतु
परं ॥ अत एव वह्निमान् गगनादित्यादौ प्रतिव्याप्तिरिति ध्येयं ॥ न चैवमपि कपिसंयोगिए
तदृक्षत्वादावव्याप्तिः ॥ कपिसंयोगाभावस्याव्याप्यवृत्तितया हेत्वधिकरणे सत्त्वादित्यतो
अधिकरणभेदेनाव्याप्यवृत्तिप्रतियोगिकाभावभेदवादिमतेन लक्षणमाह। साध्यव

ह्निनेत्यादि ॥ अत्र साध्यवद्भिन्नसाध्याभाववदिति सप्तमितत्पुरुषाः अथवा साध्यवद्भिन्ने वृत्ति साध्याभाव
वद्वृत्तित्वमिति वा कर्मधारयः ॥ वह्निमानित्यादौ वह्निमद्भिन्ने वर्त्तते यो वह्न्यभावस्तद्वति जलह्रदादौ धूम
स्यावृत्तेर्लक्षणसमन्वयः ॥ कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगवद्भिन्ने गुणादौ वर्त्तते यः क
पिसंयोगाभावः साधारणगुणादिरेव एतल्लक्षणकर्तृमते अधिकरणभेदेनाव्याप्यवृत्तिप्रतियोगिका
भावमेवात् ॥ तथा चैतद्वृक्षत्वादेस्तद्वत्तया लक्षणसमन्वयः ॥ अत्र साध्याभावानुपादाने वह्नि
मान्धूमादित्यादौ वह्निमद्भिन्ने जलह्रदवृत्तित्वघटत्वाद्यभावाधिकरणवृत्तित्वादेव धूमादेर्वृत्तितया वह्नि
मान्धूमादित्यादावसम्भवस्य दुष्परिहरत्वात् ॥ एतच्च साध्यनिवेशस्याविवक्ष्यं ॥ न चात्र

एतेर तौर

३· धिकरणभेदेनाभावभेद इत्यादिमते हृदादिवृत्तिघटाद्यभावस्याविपर्ययेनेति घटत्वाद्यभाववद्भिन्नत
या नोपदर्शितेतरित्यत्र साध्याभावादिविशेषणव्यावृत्तिसंभव इति वाच्यम्॥ लक्षणान्तरे मते व्याप्यवृत्तिव्यापकवृत्तित्वा
दिस्वविरुद्धधर्माध्यासेनाव्याप्यवृत्तिप्रतियोगिकाभावस्यैव अधिकरणभेदेन भेदाभ्युपगमाद् अन्यस्य सर्वत्रैकत्वादिति॥
ननु च ~~घटाकाश~~ संयोगघटत्वान्यतराभाववत् गगनत्वादित्यादौ अव्याप्तिः॥ तथाविधसाध्यवद्भिन्ने घटे वर्तते यः साध्या
भावो घटाकाशसंयोगः॥ तद्वृत्ति आकाशे गगनत्वस्य वृत्तेः॥ न च असंभवतुरेवेति वाच्यम्॥ घटानधिकरणदेशा
वच्छेदेन गगने घटाकाशसंयोगाभावस्य विद्यमानत्वात् तथाविधान्यतराभावसत्त्वादिति चेत् न॥ अभावाभावस्यातिरि
क्तत्वे नैतदोषाभावात्॥ तथाविधान्यतराभावाभावस्य तथाविधान्यतराभावत्वेऽपि विद्यमान
तया अव्याप्यवृत्तिप्रतियोगिकत्वेन अधिकरणभेदेन भेदात् तथा च तथाविधसाध्यवद्भिन्ने घटे वर्तते यः

इदं च घटाकाश ३

साद्दशाश्रन्यतराभावतस्यगगनेप्रसक्तेनेतत्रनातिव्याप्तिः॥ लाघवाल्लक्षणांतरमाह॥ साध्यव
त्प्रतियोगिकान्योन्याभावेत्यादि॥ वस्तुअधिकरणभेदेनाभावभेदमानाभावात्॥ कपिसंयोगि
त्वस्वरूपत्वादित्यादौ अव्याप्तिः॥ कपिसंयोगवद्भिन्ने गुणादौ वर्त्तते यो कपिसंयोगाभावः॥ न
त्वेवं तद्वृक्षेपि विद्यमानादित्यादौ लक्षणांतरमाह॥ साध्यवत्प्रतियोगिकेत्यादि॥ त
द्वैतु॥ एतल्लक्षणेपि तत्राव्याप्तिसत्वात् तादृशवतोरणिकापाअसंगतेरिति॥ स्वचेतल्ल
क्षणेनानाधिकरणसाध्यक सद्धेतौ वह्निमान्धूमादित्यादावव्याप्तिः वह्न्यादिमत्त्वं न प्र
तियोगिकभेदवति महानसादौ धूमादेर्विद्यमानत्वादित्यादौ विद्यमानत्वाल्लक्षणं

ले१ सव१ धूमा

चिं॰रि॰२॰

मु॰ तरमाह॥ सकलेत्यादि॥ वह्निमान् धूमादित्यादौ सकलसाध्याभाववद्वृत्तितलक्षणे दोऽवर्त्तते यो वह्न्यभावः तत्प्र

12 तियोगित्वस्य धूमे सत्वाल्लक्षणसमन्वयः॥ न चात्र धूमवान् वह्नेरित्यादावतिव्याप्तिः॥ सक

लधूमाभाववद्वृत्तित्वो वह्न्यभावः स्यात् प्रतियोगित्वस्य वह्नौ सत्वादिति वाच्यं॥ सकल[illegible]स्य साध्या ल्य३

१२ भाववत्यपि विशेषणीयत्वात् तथा च न तत्रातिव्याप्तिः॥ सकलसाध्याभाववत् सकलं ततः प्र[illegible] १२

तिनिरूपितो यो लके वह्न्यभावस्यावृत्तित्वात् तत्र लक्षणगमनासंभवात्॥ नचैवं सत्यपि वह्नि

मान् धूमादित्यादौऽव्याप्तिः॥ सकलसाध्यप्रतियोगित्वरव[illegible]धूमप्राभाववत् सकलं

३ प्रतियोगिवैयधिकरण्यादिरूपवत्त्वात् प्रतियोगिवैयधिकरण्यं भवत्र ३ {।अथवे४५}

विकल्प्यापत्तिः ४

तः प्रतिनिपर्वतादौ धूमाभावाप्रसक्तेरिति वाच्यं। सकलसाध्याभाववद्देनसाध्यतावच्छेदकावच्छिन्नप्रति-
योगिताकाभावस्य विवक्षणात्तु।। न चैवं सति कपिसंयोगी एतद्वृक्षत्वादौ अव्याप्तिरिति वाच्यं
साध्याभावे प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं। न च सिद्धान्तलक्षणे लक्षणे इव प्रति-
योगिव्यधिकरणपदं इति वाच्यं।। यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तिसा-
ध्यनिष्ठा तादृशप्रतियोगिकाभावस्य साध्याभावत्वेन विवक्षणात्तु।। अत्र प्रतियोगितावच्छे-
दकावच्छिन्नानिवेशानुगुणेन कमान्यत्वविशिष्टस्य तादात्म्यताते: इत्यादावव्याप्तिः। अ-
त्र प्रतियोगिवैयधिकरणे विशिष्टं साध्याभावे निवेशनीयं। अन्यथा गुणादिकं सत्तमाभा-
व संयोगाभावस्य वृक्षे सत्त्वेन कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तेः।। न चैवं सति
प्रतिकरकपिसंयोगादित्यादावव्याप्तिः ... अभाववृत्तित्वादावेकपिसंयोगा

प्रतियोगिवैयधिकरण्यनिवेशात् अत्र

चिं. टि. २.

मु. भावस्य विद्यमानत्वादिति वाच्यं ॥ हेत्वभावेपि प्रतियोगिवैयधिकरण्यं हेतुतावच्छेदका-
वच्छिन्नानधिकरणवृत्तित्वं अतो न द्रव्यत्वकर्मान्यत्वविशिष्ट सति सत्त्वादित्यादावव्याप्तिः ॥
न वा सिद्धान्तलक्षणरीत्या प्रतियोगिवैयधिकरण्यविकल्पापत्तिः ॥ हेत्वधिकरणं च हेतुताव-
च्छेदकसंबंधेन बोध्यं ॥ अतो वह्निमान् धूमादित्यादौ सकलसाध्याभाववत्तित्वं हेतौ
१३ संबंधसामान्येन पक्षमानधिकरणतद्वृत्तित्वविशिष्टसत्ताभावप्रतियोगित्वस्य सत्ता-
यां सत्त्वेनातिव्याप्तिरिति ॥ हेतुतावच्छेदकावच्छिन्नत्वं प्रतियोगितायां निवेशनीयमि- १३
ति पर्यवसितं ॥ तत्र विशिष्टसत्ताभावस्य समानत्वरूप हेतुतावच्छेदकावच्छिन्नानधिकरण

इति स्वरूपनिरूपणप्रतियोगिनि व्यधिकरणविशिष्टस्यऽव्यत्ताभाववत्सकलांतःपतिनि गुणत्वेऽ
सत्वे न लक्षणे विशेषकतयातिव्याप्तेरसंभवादिति॥ इतोपि लघुलक्षणांतरमाह॥ साध्यवदन्येति॥ वह्नि
मान्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादाव्याप्तिः॥ तथाविधसाध्याभाववद्वृत्तितादेव ... व
रूपहेतुभावस्य कस्यापि वक्तुरसत्वात्तः साध्यवदन्यत्ववत्तापत्तिकाव्रवच्छेति॥ वह्न्यभावरूप तत्तत्स्वरूप
हेतोरन्योन्याभावमादायैव लक्षणगमनसंभवात्सकलसाध्याभाववद्वृत्तिऽभावे त्वद्धऽत्वेता
न्योन्याभावसाधारणाभावरूपेणैवऽभावनिवेशनादिति॥ अत्र साध्यवदन्यत्वेन साध्यव
त्वावच्छिन्नप्रतियोगिताकभेदवाच्यबोध्यते॥ अन्यादिपदसमभिव्याहारे स्यलक्ष्यान्वयिता
वच्छेदकावच्छिन्नप्रतियोगिताकान्योन्याभाववहोबोधनियमात्तथैव वान्यादिपदसमभिव्याहारश्री
नस्यतत्रहेतुत्वे कल्पनादन्यथाऽनुपपत्त्या प्रतियोगिताकान्योन्याभाववत्त्वमात्रबोधने निलोघटोघटादन्य

मु. इति काकस्यचोपगता पर्याप्त्यावच्छेदकता निरूपितसाध्यनिष्ठावच्छेदकतानिरूपितपत्तेः॥ एवं च साध्य
वत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववद्वृत्तित्वं॥ व्याप्तिरिति॥ प्रकृतलक्षणवाक्यार्थः॥ अतो
न वह्निमान्धूमादित्यादौ महानसीयवह्नित्वमत्भेदसाधनाव्याप्तिः॥ नचैवं सत्यपि तत्राव्याप्तिः।
महानसीयवह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नप्रतियोगिताकभेदप्रतियोगिताक
भेदत्वघटकलक्षणघटकत्वादिति वाच्यं॥ साध्यतावच्छेदकपर्याप्त्यावच्छेदकतानिरूपितसाध्यनि
ष्ठावच्छेदकतानिरूपितप्रतियोगिताकान्योन्याभावस्यैव प्रकृते लक्षणे निवेशादिति॥ लक्षणं
च कमेव दूषयति केवलान्वयिन्यभावादिति॥ इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वरूपसाध्याभा
वाऽप्रसिद्ध्या अव्याप्तेरिति तात्पर्यं॥ प्रकारान्तरेण व्याप्तिलक्षणमाशंक्य दूषयति॥ नापीत्यादि। सा
ध्यसामानाधिकरण्यानधिकरण [illegible] निष्ठानधिकरणत्वं॥ उक्तं सत्त्वादित्या

रवृत्तिव्याप्तिः॥ अपि तु असामानाधिकरण्यपदस्य साध्यनिष्ठाधेयतानिरूपकाधिकरणवृत्तित्वे
लाक्षणिकतया साध्यनिष्ठाधेयतानिरूपिकाधिकरणवृत्तित्वाभावत्वमेव तत्तुद्धितिकाधिकरणत्वस्य
तु॰ वैयर्थ्येनानुपादानो [illegible] वृत्तित्वमत्र हेतौ तावच्छेदकसंबंधेनावश्यं निवेशनीयं॥ अप
था कालिकादिसंबंधेमादाय वह्निमान्धूमादित्यादेऽव्याप्तेः॥ तथा च सत्तावान्जातेरित्यादव्याप्तेः॥
सत्ताभाववति सामान्ये समवायेन वृत्तेरप्रसिद्धेरिति विभाव्यते॥ तदा स्वरूपसंबंधावच्छिन्नतथा
विधवृत्तित्वाभावविशिष्टायाः हेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्व
मेव तत्त्वे बोध्यं॥ लक्षणांतरमाह॥ साध्यवैयधिकरण्यादीति॥ अत्र साध्यानधिकरणवृत्तित्वमर्थः।
द्धितिकाधिकरणत्वस्य वैयर्थ्येनानिवेशात्॥ न च साध्यवदन्यावृत्तित्वमपि तेन नयेन रूप्यापत्ते
रिति वाच्यं॥ अत्र तथाविधवृत्तिभिन्नत्वस्यैव निवेशे न वृत्तित्वात्यंताभाववत्त्वमिति पूर्वोक्तलक्षणेन प

३. नरूपेरभावादिति॥ एतल्लक्षणे हृदयमेकं [illegible]न्यानुपपद्यत इति। तदुभयमपीति। साध्यानधिकरणमधिकरण

त्वमित्यस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणनिरूपितवृत्तित्वाभाववविशिष्टहेतुतावच्छेदकसंबं

धावच्छिन्नाधिकरणतानिरूपकतावच्छेदकहेतुतावच्छेदकत्वं साध्यानधिकरणवृत्तित्वं चार्थः॥ प्र

कृते तात्पर्यकल्पनादिति॥ तत्रेति। तादृशलक्षणं चेत्यर्थः॥ तत्रेति॥ केवलान्वयिसाध्यकहेता

वित्यर्थः॥ साध्यनिष्ठाधेयत्वानिरूपकत्वावच्छिन्नाप्रसिद्ध्यो[illegible]धिकरणत्वावच्छिन्नस्येत्यप्रसिद्ध्या

चेति शेषः॥ नानाव्यक्तिकेति साध्यकेचाव्याप्तिमाह॥ यत्किंचिदित्यादि॥ यत्किंचित्साध्यनिष्ठाधेय

त्वानिरूपकाधिकरणयत्किंचित्साध्यानधिकरणे चाप्रवर्ततो वर्तमानत्वमेवाप्रसिद्धमित्यर्थः॥ तथा च सा

ध्यनिष्ठाधेयत्वं[illegible]निरूपकाप्रसिद्ध्या साध्यानधिकरणाप्रसिद्ध्या केवलान्वयिसाध्यकहेतौ व्याप्ति

15 १५ १५

साध्यकधूमादिहेतौ च तादृशलक्षणं द्रूपमव्याप्तमिति भावः। अप्रव्रत्वमित्यस्य तु वोत्कि केवलान्वयीसाध्यक
हेतावित्यत्रापि अन्वयो बोध्य इति॥ साध्याभाववद्वृत्तित्वमिति व्याप्तिलक्षणे केवलान्वयिसाध्यके हेताव अप्यप्तेः
व्याप्तिमुद्धर्तुमाशंकते॥ अथेति॥ समवायितया वाच्यत्वाभाववद्घटवृत्तित्वादिति। एवकारो त्रै बोध्यः।
तथा च समवायितया वाच्यत्वाभावो घटे पि प्रसिद्ध इत्यर्थः॥ समवायित्वेन वाच्यत्वं नास्तीति प्र
ति [illegible]तिसिद्धं॥ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवाच्यत्वाभावके केवलान्वयिसाध्य
लक्षणसमन्वय इति भावः। वाच्यत्वं तु अस्माकं स्वरूपमर्थो बोध्य इति ईश्वरेच्छाविषयत्वं इति कि
केशालिके विशेषो वाच्यतानानुपपत्तिः॥ इति बोध्यं॥ अथ साध्याभाववद्वृत्तित्वमित्यत्र साध्यता
वच्छेदकावच्छिन्नप्रतियोगिताकाभावो ऽवश्यं निवेश्यं भावः। अन्यथा वह्निमान्धूमादित्यादौ

सि.प.टि.२.

मु० महानसीयवह्न्याद्यभावमादायाव्याप्तेः॥ तथा चेदं वाच्यं द्वैयवादित्यादेः कथं समवयिता वच्छिन्न

नि २ वाच्यत्वविशिष्टप्रतियोगिताकाभावमादाय लक्षणसमन्वयः॥ तादृशाभावस्य काव्यत्वरूपसा

ध्यतावच्छेदकावच्छिन्नप्रतियोगिकाभावेन लक्षणघटकत्वे केवलादित्यादि॥ अत्र केचित्तु॥ साध्या

२६ भाववद्वृत्तित्वमिति लक्षणे साध्यप्रतियोगिकाभावत्वेन लक्षणे निविष्ट इति भ्रमेणाशंकते॥

अथेत्यादित्याहुः॥ वस्तुतस्तु तत्र महानसीयवह्न्यभाव[illegible]मादायाव्याप्तिवारणाय २६

16 साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावो न निवेश्यते॥ केवलान्वय्यव्याप्ति

प्रसंगात्॥ अपितु साध्यतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वव्यधिकरणधर्मानवच्छिन्न

प्रतियोगिताकत्वोभयाभावविशिष्टसाध्याभावत्वं निवेश्यते तथा च नाव्याप्तिः॥ उपद्

क्षप्रमाणमव्याहतमेवेति चेन्न ॥ यतो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावेनभ्युपगमे व्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकाभावविषयलौकिकप्रत्यक्षं प्रति प्रतियोगितावच्छेदकप्रकारकस्य हेतुत्वमेव
न कल्प्यते किंतु ॥ प्रतियोगितावच्छेदकप्रकारकारकतथाविधज्ञानवत्तान्तरत्वेन घटो नास्तीत्याका
रकप्रत्यक्षोत्पत्तिरिति तादृशप्रत्यक्षात्सिद्धा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावोसि
द्ध एव ॥ पटत्वेन घटो नास्तीत्यभावप्रत्यक्षं प्रसिद्धं तथापि तद्भ्रमात्मकमेवान्यथाऽनंतरे तथा
विधाभाववत्प्रतियोगितावच्छेदकेहकत्वनागौरवादित्यादिकं स्वयमूहनीयं ॥ प्रकारांतरेण
व्याप्तिलक्षणमाशंक्य निराकरोति ॥ अथेत्यादिना ॥ साध्यासमानाधिकरणत्वं साध्याधिकर
णावृत्तित्वं अनधिकरणत्वं अभाववत्वं अधिकरणं तथा च निवेशप्रयोजनाभावात् ॥ विशेष

वि. णताविशेषसंबंधेनाऽस्वत्वाभावसामानाधिकरण्यं ।। तथा च साध्याधिकरणावृत्तित्वाभाववत्त्वं वा
स्तिरितिसाध्यासमानाधिकरणेतिलक्षणेकार्थः।। केवलान्वयिसाध्यकेसामानाधिक
रण्याप्रसिद्ध्याऽव्याप्तिः।। ननुप्रसिद्ध्यापरिहरति।। साध्यासमानाधिकरणत्वादि।। सा
ध्यासमानाधिकरणत्वं साध्याधिकरणावृत्तित्वं। साध्यासमानाधिकरणत्वं पदार्थविकल्प २.
तल्लक्षणंदूषयति।। साध्यासमानाधिकरणत्वे हिति। साध्याधिकरण[illegible]धिकरणत्वंमा
न४ [illegible] साध्यानधिकरणत्वं स्थेयेतत्वे साध्यानधिकरणवृत्तित्वमितियावत् साध्याधिकरणानधिक णार
न रणत्वं साध्याधिकरणभेदवानधिकरणपर्यवसितत्वे साध्याधिकरणवृत्तित्वमितिफलितावस्थायां
व्याप्तिंदूषयति। केवलान्वयिनीति। साध्याधिकरणाप्रसिद्धेरितिशेषः।। द्वितीयंदूषयति रामः. २.

मेव.प्राधिकरणवेस्य३

रघु ८

यत्किंचित्साध्याधिकरणानधिकरणधूमेत्यादि ॥ महानसीयवह्न्याद्यधिकरणावृत्ति-
तिधूमो दावित्यर्थः ॥ अप्रसिद्धेति ॥ साध्यानधिकरणवृत्तित्वाप्रसिद्ध्या साध्याधिक-
रणावृत्तित्वाप्रसिद्ध्या चेत्यर्थः ॥ अत्र यथासंख्यं केवलान्वयिनि साध्ये केवलान्वयिनः ॥ तथा च साध्यान-

भाव

धिकरणवृत्तित्वघटितलक्षणे केवलान्वयिसाध्यकेऽव्याप्तिः ॥ साध्याधिकरणावृत्तित्वघ- २
टिते तु वह्निमान्धूमादित्यादौ नानाव्यक्तिसाध्यकेऽव्याप्तिरिति ॥ तदुभयान्यतरघ-
टितमस्त्वित्यभिभावः ॥ द्वयपलक्षणं ॥ साध्याधिकरणावृत्तित्वघटितलक्षणेऽद्वयं सद्धेत्वादिर-
प्याव्यवृत्तिव्याप्तिरपि दुष्टव्या ॥ नापि स्ववृत्यादि ॥ अत्र स्वपदं हेतुतावच्छेदकावच्छिन्नहेतुप-

समा॰ त

१८

मु॰ । स्यात्तथा च यद्धर्मावच्छिन्नसमानाधिकरण्यं तदभावाप्रतियोगिधर्मावच्छिन्नं तद्धर्मावच्छिन्नसमा-
नाधिकरणत्वं तद्धर्मावच्छिन्ननिष्ठा व्याप्तिरिति । लक्षणनिष्कर्षो बोध्यः । पर्वतीयवह्नित्वावच्छि-
च्छिन्नो पर्वतीयवह्नेः । महानसीयधूमस्य धूमत्वावच्छिन्नो महानसीयधूमस्य तथा च
साध्यस्मादित्यादेरव्याप्तिरिति भावः । नन्वेवं धर्मावच्छिन्नानधिकरणवृत्तित्वे अत्यन्ता-
भावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तद्वच्छिन्नवह्निसामानाधिकरण्यमा-
त्रिरिति । अत्रेव नोपदर्शितेऽसम्भवेऽव्याप्तिः । धूमवति वह्निर्[illegible] प्रतियोगि-
वह्नित्वस्य धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वादित्यत आह । सम्-
सत्त्वादित्यादावव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाह । द्रव्यत्वादित्याहा । अवव-

२१
२२

२॰
णार
रास॰
२॰

द्रव्यत्वादि॰

। ३

प्यवृत्तित्वात्संयोगादित्यर्थः ॥ प्रतियोगिविशेषितमिति ॥ प्रतियोग्यधिकरणमित्यर्थः । व्याप्य
वृत्तित्वमिति अवच्छिन्नवृत्तिकान्यत्वमित्याहेऽव्याप्यवृत्ति व्यावृत्तिं न घटे स्याह ॥ प्र
तियोगिनि ॥ प्रतियोगिविशेषितं यदि प्रतियोग्यनधिकरणवृत्तित्वमित्युच्यते न सा
संयोगि सत्त्वात् संयोगिद्रव्यत्वादित्यर्थः ॥ अभावस्य च लक्षणे हेतुसमानाधिकरणोऽभाव
विशेषणं ॥ तथा च संयोगिद्रव्यत्वादित्यादौ संयोगाभावस्य प्रतियोग्यधिकरणवृत्ति
त्वादव्यवच्छिन्नवृत्तित्वं न यावल्लक्षणघटकत्वेन न व्याप्तिरिति भावः । अनैकान्तिकत्वाभावप्रसं
गात् व्यभिचारिण्यभावस्य प्रसंगात् ॥ व्याप्यत्वप्रसंगादिति वक्तुं ॥ उपदर्शितरीत्या संयो
गाभावस्य लक्षणघटकत्वे न तु संयोगी सत्त्वादित्यादावव्याप्तेः । इति भावः । न च अधिक

गि१

वि. शि.

मु. णभेदेन वृत्त्यभावभेदत्वादिमत गुणादौ द्रव्यवृत्तिसंयोगाभावभिन्नत्व एव संयोगाभावत्वे: । तथा च
संयोगिसत्त्वादित्यादौ नातिव्याप्तिः । अत्र गुणवृत्तिसंयोगाभावस्यापि प्रतियोग्यधिकरणवृत्ति
तया लक्षणघटकत्वादित्यत आह ।। नहीत्यादि ।। प्रतियोगिविरोधि प्रतियोगिव्यधिकरण
२२ वृत्तिमत्परः द्रव्यवृत्तिसंयोगाभावभिन्नेः । अभावभेदमात्रादितीति ।। प्रमाणाभावादिति
शेषः ।। न च व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासात्तयोर्हि स्वावच्छेदक
इति वाच्यं ।। यतः संयोगाभावेऽव्याप्यवृत्तित्वावच्छिन्नवृत्तिकत्वावच्छिन्नवृत्तिकान्यत्वरूपविरुद्ध २२
धर्मद्वयं नांगीक्रियते येन तद्ध्यासात्तयोर्भेदो स्यु यतः । अपि तु गुणादिवृत्त्यभावाप्रति
योगिरूपव्याप्यवृत्तित्वद्रव्यवृत्त्यभावप्रतियोगित्वरूपाव्याप्यवृत्तित्वं चैतद्व्याप्युपेयते ॥